# SAMPLE PAPER

# प्राग्वार्षिक-परीक्षा- 2020-21

**कक्षा-दशमी**

**विषयः- संस्कृतम् (122)**

**समयः - होरात्रयम्**

**सामान्यनिर्देशाः**

- कृपया सम्यक्तया परीक्षणम् कुर्वन्तु यत् अस्मिन् पत्रे 18 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणम् कुर्वन्तु यद् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति।
- उत्तर-लेखनात्पूर्वं प्रश्नस्य क्रमांकः अवश्यमेव लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम्, उत्तरपुस्तिकायां किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्**

**<u>अ-भागः</u>**

**बहुविकल्पात्मकप्रश्नाः (40 अंकाः)**

अनुप्रयुक्तव्याकरणम् - ( 25 अंकाः)

पठित-अवबोधनम् - ( 15 अंकाः)

**<u>आ-भागः</u>**

**वर्णनात्मकाः प्रश्नाः - (40 अंकाः)**

अपठित-अवबोधनम्- ( 10 अंकाः)

रचनात्मककार्यम् - ( 15 अंकाः)

पठित-अवबोधनम्- ( 15 अंकाः)

## <u>निर्देशाः</u>

(i) अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) 'अ' – भागः बहुविकल्पात्मकः अस्ति।

(iii) 'आ' – भागः वर्णनात्मकः अस्ति।

(iv) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(v) सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन लेखनीयानि।

(vi) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

# <u>अ-भाग:</u> ( 40 अङ्का:)

## (बहुविकल्पात्मकाः प्रश्नाः)

## <u>अनुप्रयुक्तव्याकरणम्</u>

**1. अधोलिखितवाक्येषु स्थूलपदानां सन्धिं सन्धिच्छेदं वा कुरुत- (केवलं प्रश्न-चतुष्टयम्) (1×4=4)**

(i) संस्कृतपठनेन जन: **सन्मति**: भवति।

(क) सत्+मति: (ख) सन्+मति: (ग) सन्म+अति

(ii) रामेण गोपालात् **पृथक्+उच्यते**।

(क) पृथकुच्यते (ख) पृथगुच्यते (ग) पृथगोच्यते

(iii) पुत्र: पितरं **नम**: + **करोति**।

(क)नमोकरोति (ख) नम:करोति (ग) नमस्करोति

(iv) वने **पशवोऽधावन्**।

(क) पशवो+धावन् (ख) पशवः + अधावन् (ग) पशव + अधावन्

(v) मार्गे **बाल:+चलति**।

(क) बालश्चलति (ख) बालस्चलति (ग) बालष्चलति

**(2) अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्) (1×4=4)**

(i) <u>न्यायालय</u>: न्यायप्रदानाय भवति।

(क) न्यायेषु आलय: (ख) न्यायस्य आलयः (ग) न्यायान् आलय:

(ii) श्रीकृष्ण: **<u>मोहग्रस्तम्</u>** अर्जुनम् उपादिशत्।

(क) मोहाय ग्रस्तम् (ख) मोहस्य ग्रस्तम् (ग) मोहेन ग्रस्तम्

(iii) एषः बालकः **<u>उपनेत्रम्</u>** धरति।

(क) नेत्रस्य योग्यम्   (ख) नेत्रयोः समीपम्   (ग) नेत्रम् अनतिक्रम्य

(iv) लघुछात्रः **<u>बलम् अनतिक्रम्य</u>** कार्यं करोति।

(क) यथाबलस्य   (ख) यथाबलः   (ग) यथाबलम्

(v) **<u>कृष्णरामौ</u>** राजभवने खेलतः।

(क) रामौ कृष्णः च   (ख) कृष्णः च रामः च   (ग) रामम् च कृष्णम् च

**(3) अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)** **(1×4=4)**

(i) **<u>धनवान्</u>** जनः सर्वत्र प्रसिध्यति ।

(क) धन+मतुप्   (ख) धन+क्तवतु   (ग) धन+टाप्

(ii) छात्रेषु **<u>सरलत्वम्</u>** अपेक्ष्यते।

(क) सरल+तल्   (ख) सरल+टाप्   (ग) सरल+त्व

(iii) सीतायाः **<u>वत्सलता</u>** सर्वे जानन्ति।

(क) वत्सल+त्व   (ख) वत्सल+तल्   (ग) वत्सल+मतुप्

(iv) **<u>श्यामा</u>** राधायाः एव नाम अस्ति।

(क) श्याम+टाप्   (ख) श्याम+त्व   (ग) श्याम+मतुप्

(v) भारतवासिनां **<u>उदार+तल्</u>** विश्वप्रसिद्धा अस्ति।

(क) उदारता   (ख) उदारत्वम्   (ग) उदारमान्

**(4.) वाच्यस्य नियमानुगुणम् उचितविकल्पं चित्वा अधोलिखितं संवादं पुनः लिखत- (केवलं प्रश्नत्रयम्)** **(1×3=3)**

नरेन्द्रः : - सुनील! किं........आपणम् गच्छसि?

(क) त्वम्   (ख) त्वया   (ग) त्वाम्

सुनीलः - न मया तु अधुना स्वपाठः .........।

(क) पठति   (ख) पठामि   (ग) पठ्यते

अस्मिता- सुनील! किं त्वया ........अपि लिख्यन्ते?

(क) लेखान्   (ख) लेखाः   (ग) लेखे

सुनीलः - आम्! अहं यदा कदा ........ लिखामि ।

(क) लेखान्   (ख) लेखाः   (ग) लेखे

**(5.) कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नचतुष्टयम्)** **(1×4=4)**

(i) मम माता प्रातः **<u>5:30</u>** वादने उत्तिष्ठति।

(क) सपाद-पञ्चवादने   (ख) सार्ध-पञ्चवादने   (ग) पञ्चवादने

(ii) सा प्रातः **<u>6:00</u>** वादने प्रातः भ्रमणम् गच्छति।

(क) पादोन-षड्वादने   (ख) सार्ध-षड्वादने   (ग) षड्वादने

(iii) सा प्रातः **<u>6:45</u>** वादने भ्रमणतः आगच्छति।

(क) सार्ध-षड्वादने (ख) सपाद-षड्वादने (ग) पादोन-सप्तवादने

(iv) सा प्रातः **<u>7:15</u>** वादने अल्पाहारंनिर्माति।

(क) सार्ध-सप्तवादने (ख) सपाद-सप्तवादने (ग) पादोन-सप्तवादने

(v) सा प्रातः **<u>7:30</u>** वादने सर्वेभ्यः अल्पाहारं ददाति।

(क) सार्ध-सप्तवादने (ख) सपाद-सप्तवादने (ग) पादोन-सप्तवादने

**(6.) वाक्यानुगुणम् उचिताव्ययपदं चित्वा अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नत्रयम्) (1×3=3)**

१. छात्राः ..........न वदेयुः।

(क) उच्चैः (ख) इतस्ततः (ग) यतः

२. उद्याने बालकाः .........क्रीड़न्ति।

(क) सहसा (ख) यथा (ग) इतस्ततः

३. मार्गे एकः गजः .........गच्छति।

(क) सहसा (ख) शनैः (ग) ह्यः

४.आरक्षिभटः...........निरीक्षणार्थम् आगतः।

(क) सहसा (ख) श्वः (ग) यथा

**(7.) अधोलिखित-वाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नत्रयम्) (1×3=3)**

(i) सुरेशः **<u>अनेकं</u>** फलानि खादति।

(क) अनेके (ख) अनेकानि (ग) अनेका

(ii) **<u>सा</u>** बालकः लेखनं करोति।

(क) युवाम् (ख) त्वम् (ग) सः

(iii) सर्वे **<u>जन</u>**ः सुखिनो भवन्तु।

(क) जनेषु (ख) जनाः (ग) जनैः

(iv) त्वं मार्गे **<u>चलति</u>**।

(क) चलन्ति (ख) चलसि (ग) चलामि

**8. वाक्येषु रेखांकितपदानि अधिकृत्य पञ्च प्रश्नानां निर्माणम् कुरुत- (1×5=5)**

१. दुर्बले सुतेः **<u>मातु</u>**ः अभ्यधिका कृपा भवति।

(क) कस्याः (ख) कस्य (ग) केषां

२. **<u>उद्यमेन</u>** समः बन्धुः नास्ति।

(क) कया (ख) केन (ग) कस्य

३ . क्रोधः. **<u>नराणां</u>** शत्रुः भवति।

(क) कासां (ख) केषां (ग) कासु

४. काक**:** **<u>विचित्र</u>**: भवति।

(क) कीदृशः (ख) का (ग) कः

५. बकः **<u>जले</u>** बहुकालपर्यन्तं तिष्ठति ।

(क) कस्य (ख) कुत्र (ग) कम्

**9. अधोलिखितवाक्येषु रेखाङ्कित्पदानां प्रसङ्गानूकुलम् उचितार्थं चिनुत- (केवलं प्रश्नचतुष्टयम्) (1×4=4)**

१. **<u>दुर्वहम्</u>** अत्र जीवितं जातम्।

(क) सरलं (ख) तरलं (ग) कठिनम्

२. सा **<u>जम्बुकं</u>** तर्जयन्ती प्रावोचत्।

(क) शृगालं (ख) व्याघ्रं (ग) कच्छपं

३. शरीरस्य **<u>आयास</u>** जनकं कर्म व्यायामसंज्ञितम्

(क) आलस्यं (ख) प्रयत्नः (ग) प्रत्नः

४. वायुमण्डलं **<u>भृशं</u>** दूषितम् अस्ति।

(क) अधिकम् (ख) अल्पम् (ग) तीव्रम्

५. एकान्ते **<u>कान्तारे</u>** क्षणमपि मे स्यात् संचरणम्।

(क) नगरे (ख) वने (ग) मार्गे

**10. भाषिककार्यम्- निर्देशानुसारेण उत्तरं लिखत- (केवलं प्रश्न-षट्कम्) (1×6=6)**

१."चौरः उच्चैः क्रोशितुम् आरभत"। अत्र '**आरभत**' क्रियापदस्य कर्तृपदं किम्?

(क) उच्चैः (ख) चौरः (ग) क्रोशितुम्

२. "प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन्।" वाक्येऽस्मिन् '**ग्रामवासिनः**' इत्यस्य विशेषणपदं किम्?

(क) प्रबुद्धाः (ख) निष्क्रम्य (ग) ग्रामवासिनः

३. "पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्" इत्यत्र **'पिता'** इति कर्तृपदस्य क्रियापदं किम्?

(क) पुत्राय (ख) महत् (ग) यच्छति

४. "आचारः प्रथमो धर्मः भवति।" इति वाक्ये विशेष्यपदं किमस्ति?

(क) आचारः (ख) धर्मः (ग) प्रथमो

५. "स केनापि प्रकारेण परैर्न परिभूयते"। अत्र पंक्तौ "**तिरस्क्रियते**" इति पदस्य कः समानार्थकः प्रयुक्तः?

(क) परैः (ख) प्रकारेण (ग) परिभूयते

६. "ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति। इत्यत्र "**ददाति**" इति पदस्य कः विलोमः प्रयुक्तः?

(क) आख्याति (ख) प्रतिगृह्णाति (ग) पृच्छति

# आ- भागः

## (वर्णनात्मकाः प्रश्नाः) (40 अङ्काः)

## अपठित-अवबोधनम्

**11. अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-**

हिमालयो नाम पर्वतः भारत-देशस्य उत्तरस्यां दिशि वर्तते। अस्य शिखरभागाः सदैव हिमाच्छादिताः भवन्ति। अतएव सः हिमस्य आलयः अर्थात् 'हिमालयः' कथ्यते। सः विश्वस्य समस्तेषु पर्वतेषु उन्नततमः। अत एव सः 'नगाधिराजः' इत्यपि ज्ञायते। पर्वतोऽयं भगवतः शिवस्य 'क्रीडास्थली, भगवत्याः पार्वत्याः उत्पत्तिस्थलमपि अस्ति। विविधकिन्नर-गन्धर्व-साधु-सुरादीनां वसतिरपि हिमालयः एव।हिमालयात् एव गङ्गा प्रभवति। गङ्गा भारतस्य प्रमुखतमासु नदीषु अन्यतमा वर्तते। हिमालयस्य महिमा वर्णनातीतः विद्यते।

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **(1×2=2)**

(क) हिमालयः भारतस्य कस्यां दिशि वर्तते?

(ख) हिमालयः कस्य क्रीडास्थली?

(ग) हिमालयः केषां वसतिः?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **(2×2=4)**

(क) हिमालयः पदस्य समास विग्रहः कः?

(ख) हिमाच्छादिताः के भवन्ति?

(ग) कः विश्वस्य समस्तेषु पर्वतेषु उन्नततमः?

**(इ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत-** **(1×1=1)**

**(ई) यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्)** **(1×3=3)**

(क) "सः विश्वस्य समस्तेषु पर्वतेषु उन्नततमः।" अस्मिन् वाक्ये "सः" इति सर्वनाम कस्मै प्रयुक्तम्?

(i) हिमालयः (ii) नदी (iii) हिमः

(ख) "हिमालयात् एव गङ्गा प्रभवति।' अस्मिन्वाक्ये "प्रभवति" इति क्रियापदस्य कर्तृपदं किमस्ति?

(i) हिमालयात् (ii) गङ्गा (iii) एव

(ग) ‘भगवत्या:पार्वत्या:’ इत्यनयोः पदयो: विशेष्यपदं किम्?

(i) भगवत्या: (ii) पार्वत्या: (iii) उभौ

## रचनात्मकं कार्यम्

**12. भवान् वेदव्यास:। दशमकक्षायां प्रथमश्रेण्यामुत्तीर्णम् गोविन्दनामधेयम् अनुजं प्रति लिखितम् वर्धापनपत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुनः लिखतु- (5)**

तिथि: .......

परीक्षा-भवनम्

परमप्रिय अनुज गोविन्द!

चिरञ्जीव!

अद्यैव तव पत्रं (i)---------- पत्रे तवाक्षराणि विलोक्यैव मन: अतुष्यत् (ii)--------- यदा पठितं यत् त्वं दशम-श्रेण्यां (iii)-------- उत्तीर्णोसि तदा तु मम मन:सागरे प्रसन्नताया: (iv) ------- अभवत्। अहं मन्ये यत् संस्कृतविषयस्य (v) .......... एव त्वां प्रथमस्थानं प्रापयन्। अस्तु।

दिनद्वयानन्तरं (vi)----------- भविष्यन्ति। अहं शीघ्रमेव तव (vii)--------- आगमिष्यामि। (viii)------- सर्वान् श्रावयतु। आशासे यत् भवान् अग्रेपि(ix) -------- एवमेव प्रवर्तयिष्यति । तुभ्यं बहूनि (x).......... सन्तु।

पूज्यपितरयो: चरणेषु मम प्रणामा:।

तव ज्येष्ठो भ्राता

वेदव्यास:

मञ्जूषा-

| |
|---|
| वर्धापनानि, अतिरेकः, दर्शनार्थं, पश्चात्, श्रेष्ठाङ्काः, सफलताक्रमः, प्राप्तम्, सफलतासमाचारं, प्रथमस्थाने, ग्रीष्मावकाशाः |

**13. अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहयोगेन पञ्चवाक्यानि संस्कृतेन लिखत-**

**(1×5=5)**



मञ्जूषाः-

| |
|---|
| उद्यानस्य, बालकाः, क्रीडन्ति, उच्छलति, बालकौ, बालिके, मिलित्वा, पादकन्दुकं, पादेन, प्रहरति, प्रसन्नाः, भवन्ति, वृक्षाः, घासः |

अथवा

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चवाक्यात्मकम् एकम् अनुच्छेदं लिखत-**

**शीर्षकम्:- प्रभात-कालः**

मञ्जूषा-

| |
|---|
| सूर्यः, आकाशे, खगाः, स्वच्छवायुः, उड्डयन्ते, प्रवहति, कलरवः, कुर्वन्ति, जनाः, व्यायामं, उत्तिष्ठन्ति, बालकाः |

**14.अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत-(केवलं वाक्यपञ्चकम्) (1×5=5)**

१. मोहन विद्यालय जाता है।

२. व्यायाम से शरीर स्वस्थ होगा।

३. हम आज उद्यान घूमने गए।

४. तू पढता है।

५. हम दो भोजन करते हैं।

६. राम और रमेश घर जाते हैं।

७. सत्य की सदा विजय होती है।

## "पठितावबोधनम्"

**15.अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**

आदेशं प्राप्य उभौ प्राचलताम् । तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ । आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच-रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।

**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **(1/2×2=1)**

(क) आरक्षी कीदृशः आसीत्?

(ख) सः कया क्रन्दति स्म?

(ग) तौ शवं कुत्र स्थिपितवन्तौ?

**(ब) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **(1×2=2)**

(क) अभियुक्तस्य क्रन्दनं श्रुत्वा मुदितः आरक्षी तं किम् अकथयत्?

(ख) आरक्षी किम् उक्त्वा उच्चैः अहसत्?

(ग) कस्य वहनं कस्य कृते दुष्करम् आसीत्?

**16. अधोलिखितं पद्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**

**वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।**

**कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ।**

**करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम् । शुचि पर्यावरणम् ।**

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **(1/2×2= 1)**

(क) धरातलं कीदृशम् अस्ति?

(ख) किं निर्मलं न अस्ति?

(ग) भक्ष्यं केन मिश्रितं जातम्?

**(ब) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **(1×2=2)**

(क) कविः कुत्र शुद्धीकरणं कर्तुं कथयति?

(ख) अधुना वायुमण्डलं कीदृशम् अभवत्?

(ग) जलं कीदृशम् नास्ति?

**17. अधोलिखितं नाट्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**

**मयूरः** - को न जानाति तव ध्यानावस्थाम्। 'स्थितप्रज्ञ' इति व्याजेन वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि । धिक् त्वाम्। तव कारणात् तु सर्वं पक्षिकुलमेवावमानितं जातम्।

**वानरः** - (सगर्वम्) अतएव कथयामि यत् अहमेव योग्यः वनराजपदाय। शीघ्रमेव मम राज्याभिषेक तत्पराः भवन्तु सर्वे वन्यजीवाः।

**मयूरः** - अरे वानर! तूष्णीं भव। कथं त्वं योग्यः वनराजपदाय? पश्यतु पश्यतु मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एवाहं पक्षीराजः कृतः, अतः वने निवसन्तं मां वनराज रूपेण अपि द्रष्टुं सज्जाः भवन्तु अधुना । यतः कथं कोऽप्यन्यः विधातुः निर्णयम् अन्यथाकर्तुं क्षमः।

**काकः** - (सव्यङ्ग्यम्) अरे अहिभुक् । नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।

**मयूरः** - यतः मम नृत्यं तु प्रकृतेः आराधना। पश्य! पश्य! मम पिच्छानामपूर्वं सौंदर्यम् ( पिच्छानुद्घाट्य नृत्यमुद्रायां स्थितः सन् ) न कोऽपि त्रैलोक्ये मत्सदृशः सुन्दरः। वन्यजन्तूनामुपरि आक्रमणं कर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि। अतः अहमेव योग्यः वनराजपदाय ।

**(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयं)** **(1/2×2=1)**

(क) केषां सौन्दर्यं अपूर्वम् अस्ति ।

(ख) 'नृत्यातिरिक्तं तव का विशेषता?' इति कः कथयति?

(ग) कस्य नृत्यः प्रकृतेः आराधना भवति?

**(ब) पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयं)** **(1×2=2)**

(क) बकः मीनान् कथं भक्षयति?

(ख) काकः सव्यङ्गं किं कथयति?

(ग) मयूरः कं वनात् बहिष्करिष्यामि इति वदति?

**18. मञ्जूषातः समुचितपदानि चित्वा अधोलिखतश्लोकस्य अन्वयं पूरयत-** **(1/2×4=2)**

**श्लोकः-**

**आचारः प्रथमो धर्मः , इत्येतद् विदुषां वचः।**

**तस्मात् रक्षेत् सदाचारं , प्राणेभ्योऽपि विशेषतः ।।**

अन्वयः-

(i).................प्रथमः धर्मः इति एतत् (ii) .................वचः, तस्मात् (iii)..................अपि सदाचारं (iv) ..................रक्षेत् ।

मञ्जूषाः-

| |
|---|
| विदुषां, आचारः, विशेषतः, प्राणेभ्योऽपि |

अथवा,

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थं रिक्तस्थानानि पूरयित्वा लिखत ।**

**श्लोक- आलस्यं हि मनुष्याणां , शरीरस्थो महान् रिपुः ।**

**नास्त्युद्यमसमो बन्धुः , कृत्वा यं नावसीदति ।।**

भावार्थः – अस्य भावः अस्ति यत् (i).................शरीरे स्थितम् (ii) ..................एव तेषां महान् शत्रुः अस्ति ।एवमेव पुरुषार्थम् इव तेषां कोऽपि अन्यः (iii).....................नास्ति । तं (पुरुषार्थं) कृत्वा (iv)................कदापि दुःखं न प्राप्नुवन्ति ।

मञ्जूषाः-

| |
|---|
| बन्धुः, मनुष्यः, आलस्यम्, मनुष्याणां |

**19. अधोलिखितवाक्यानि कथाक्रमानुसारेण संयोज्य पुनः लिखत- (1/2×8=4)**

(क) तस्य समीपे द्वौ बलिवर्दौ आस्ताम् ।

(ख) सः ऋषभः हलमूढ्वा गन्तुम् अशक्तः क्षेत्रे पपात् ।

(ग) एकः कृषकः आसीत् ।

(घ) कृषीवलः क्रुद्धः अभवत् ।

(ङ) कृषकः तं दुर्बलं वृषभं तोदनेन अवर्तत ।

(च) तयोः बलिवर्दयोः एकः शरीरेण दुर्बलः आसीत् ।

(छ) तमुत्थापयितुं बहुवारं यत्नमकरोत् तथापि सः नोत्थितः ।

(ज) सः जवेन गन्तुम् अशक्तः चासीत् ।